अभिलाषाष्टकम्

एकं ब्रह्मैवाद्वितीयम् समस्तम् सत्यं सत्यम् नेहनानास्ति किञ्चित् ।
एकोरुद्रो नद्वितीयाय तस्ते तस्मादेकं त्वां प्रपद्ये सदाहम् ।। १
एकः कर्ता त्वं हि सर्वस्य शम्भो नानारूपेष्वेकरूपोऽस्यरूप ।
यद्वत्प्रत्यप्सु अर्कः एकोऽप्यनेकः तस्मान्नायम् त्वां विनेशम् प्रपद्ये ।।२
रज्ज्वौसर्पश्शुक्तिकायाञ्च रूप्यं नैरःपूरतन् मृगाख्ये मरीचौ ।
यद्वत्तद्वत् विश्वक् एषः प्रपञ्चःयस्मिन् ज्ञाते तं प्रपद्ये महेशम् ।।३
तोये शैत्यम् दाहक तद्वञ्च वन्हौ तापोपानौ शीतपानौ प्रसादः।
पुष्पेगन्धः दुग्धमध्येऽपि सर्पिःयत्तच्छम्भो त्वं ततस्त्वाम् प्रपद्ये ।।४
शब्दंगृह्णासि अश्रवाः त्वंहि जिघ्रे अग्राणस्त्वं व्यङ्घ्रिराासि दूरात् ।
व्यक्षः पश्येत्वं रसज्ञोऽपि अजिह्वःकस्त्वां सम्यक्चेत्थि अतस्वां प्रपद्ये ।।५
नोवेदत्वां ईशसाक्षात् विवेद नोवाविष्णुः निविदादाखिलस्य ।
नो योगीन्द्राः नेन्द्रामुख्याश्चदेवाः भक्तोवेदत्वां अतस्त्वां प्रपद्ये ।।६
नोते गोत्रं नेच जन्मापिनाख्या नोवारूपं नैवशीलम् नतेजः ।
इत्थंभूतोऽपि ईश्वरस्त्वं त्रिलोक्याः सर्वान्कामान् पूरये तत्भजेऽहम् ।।७
त्वत्तसर्वं त्वं हि सर्वं स्मरारे त्वं गौरीश त्वञ्च नग्नः अतिशान्तः ।
त्वंवैवृध्दः त्वंयुवा त्वञ्चबालः त्वयत् किन्नासि अतस्त्वांनतोऽस्मि ।।८

स्कान्द पुराणम् -काशी कण्डं